National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 224-227
© 2025 NJHSR
www.sanskritarticle.com

**N.Aravindhan**
Research Scholar,
Department of Krishna Yajur Vedam,
Sri Venkateswara Vedic University,
Tirupati

.

**Correspondence:**
**N.Aravindhan**
Research Scholar,
Department of Krishna Yajur Vedam,
Sri Venkateswara Vedic University,
Tirupati

# वेदोऽखिलो धर्ममूलम्

## (वेद विभागः, विषयः, लक्षणम् च)

**N.Aravindhan**

**अनुक्रमणिका**

**1. वेदविभागः**
**2. वेदे प्रतिपादितः विषयः**
**3. वेदशाखापरिचयः**
**3.1 उपलभ्यमानाः वेदशाखाः**
**4. वेदस्वरमहिमा**
**4.1 वेदस्वरवाङ्मयम्**
**5. वेदोच्चारणस्य प्रामुख्यम्**
**6. वेदलक्षणम्**
**7. पादटिप्पणयः**
**8. संदर्भसूची**

### १.वेदविभागः

भारतीयसंस्कृतेः जीवनपद्धतेरखिलस्य जगतश्च मूलस्कन्दा वेदाः भवन्ति । सृष्टौ सर्वप्रथमं वाङ्मयं वेदः। न केवलं मनुजस्य अपि तु प्रणिमात्रस्य लौकिकालौकिक श्रेयसा धनभूतः। अत एव अपौरुषेयत्व नित्यत्व अनादित्वादिधर्मयुक्तः वेदः सर्वेष्वपि कालेषु सर्वैः पूर्वतनैराधुनिकैश्च जनैः सर्वोत्कृष्टप्रमाणत्वेन उररीक्रियते। त्रुष्टिप्रक्रियायाः वेदायत्तत्वात् आद्येयं वैदिकी वागित्यत्र नास्ति संशीतिः। भारतीयमान्यतायाः अनुसारं कोऽपि ऋषिः मुनिः विद्वान् वा वेदं नारचयत्। परमात्मनः उच्छवास निश्वासरूपाः वेदाः नित्याः अपौरुषेयाश्च। वेदः नपुरुषनिर्मितः इति तस्य अपौरुषेयः इति नाम प्रसिद्धम्। सः शब्दस्वरूपं ब्रह्मेति कृत्वा वेदः साक्षात् ब्रह्मणः स्वरूपमिति वदन्ति। वेदस्य महिमा अवर्णनीयः। ***यतोवाचो निवर्तन्त*** इत्येतत्तैत्तिरीयोपनिषद्वाक्यं वेदमहिमा निरतिशयः इति प्रतिपादयति।[1]

वेदस्य अनन्तत्वं **"अनन्ता वै वेदाः"** इति प्रसिद्धं वाक्यं गमयति।[2] अस्य महतो भूतस्य निश्वसितमेतत् यदृग्वेदो यजुर्वेदस्सामवेदोऽथर्वाङ्गिरसः इति बृहदारण्यकोपनिषदा वेदस्य चातुर्विध्यं प्रतिपादितं वर्तते।[3] अत एव सृष्ट्यादौ एकाकारेण विद्यमानं वेदराशिं अल्पायुषाम् अल्पमेधसाञ्च अध्ययनसौकर्याय परमकारुणिकः वेदव्यासमहर्षिः ऋग्यजुस्सामाथर्वभेदेन चतुर्धाव्यभजत् इत्ययं विषयोऽप्यत्रसंगच्छते।

कारणजन्मा भगवान् बादरायणः व्यासः भाविनिकाले अल्पजीविनः मनुष्यस्य बुद्धिहीनतां पूर्वमेव विचिन्त्य अतीव कृपया अध्ययनाध्यापनयोः ग्रहणधारणादिसौलभ्याय, सुलभाध्ययनाय च, पुरा एकधा सन्तम् अनन्तवेदराशिम् ऋग्यजुस्सामाथर्वभेदेन चतुर्धा व्यभजत्। तव्याप्तये स्वशिष्येभ्यः पैलवैशम्पायनजैमिनिसुमन्तुभ्यः तान् उपादिशत्।

तेन प्रकारेण वैशम्पायनः स्वगुरोः व्यासात् यजुर्वेदमग्रहीत्। तथा हि –

"वेदश्चैकश्चतुर्धा तु व्यस्यते द्वापरादिषु ।
संक्षिप्य सकलान् वेदान् चतुर्धा कृतवान् द्विजः ।
ऋग्वेदः प्रथमः प्रोक्तः यजुर्वेदस्ततः परः ॥
तृतीयः सामवेदाख्यः चतुर्थोऽथर्व उच्यते ॥[4]

तत्र विशिष्य ऋक्सामयजुर्मन्त्राणां स्वरूपं भगवता जैमिनिना प्रदर्शितं पूर्वमीमांसाशास्त्रे। पदार्थानुसारं छन्दोबद्धः मन्त्रः ऋक् शब्देन कथ्यते, गीतिरूपो मन्त्रः सामशब्देन कथ्यते, छन्दोगीतिवर्जितप्रश्लिष्टमन्त्रश्च यजुः शब्देन कथ्यते।

तदेव सूत्रत्रयेण सूत्रितं भगवता जैमिनिना । यथा –

"तेषामृग्यत्रार्थवशेन पादव्यवस्था। गीतिषु सामाख्या। शेषे यजुश्शब्दः।[5]

इमां भावनां **"यो वै ब्रह्माणं विदधाति पूर्वम् । यो वै वेदांश्च प्रहिणोति तस्मै"** इत्यादिवाक्यजातं दृढयति।[6]

एतादृशमहत्त्वपूर्णस्य वेदस्य अपौरुषेयत्वम्-नित्यत्वम् अनादित्वञ्च श्रुतिस्मृतिभ्यां विस्पष्टमवगम्यते। तत्रोक्तम् ऋक्संहितायाम् **"वाचा विरूपनित्यया"** इति।[7]

उक्तं च भगवता जैमिनिना –

"तत्प्रमाणं बादरायणस्यानपेक्षत्वात्।"[8]

एवं महाभारतेऽप्युक्तम् –

"अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।[9]

अत्रायं विवेकः – पौरुषेयवाक्यं बोधकमपि पुरुषगतभ्रान्तिमूलकत्वेन अन्यप्रमाणमपेक्ष्यैव प्रमाणं भवति। वेदस्य तु इतरप्रमाणापेक्षानधीनत्वात् कर्तृदोषशङ्काया अभावाच्च नित्यत्वं सुस्थिरं भवति। अपौरुषेयत्वात् नित्यत्वाच्चानादित्वं सिद्धमेव।

प्रकारान्तरेण वेदस्य द्विधा विभागः परिदृश्यते। तथाहि –

1. कर्मकाण्डः
2. ज्ञानकाण्डश्चेति

**कर्मकाण्डः**

"वेदा हि यज्ञार्थमभिप्रवृत्ताः" इति वचनानुरोधेन यज्ञार्था हि वेदानां प्रवृत्तिः गम्यते।[10] तत्र केचन यज्ञाः अग्निहोत्रादयः अल्पायाससाध्याः। केचन गवामयनादयः बह्वायाससाध्याः। एवमग्निहोत्रादिगवामयनपर्यन्तं विद्यमानानां यज्ञानामनुष्ठानविधिः अस्य कर्मकाण्डस्य मुख्यो विषयः ।

**ज्ञानकाण्डः**

"सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिलक्षणयुक्तस्य परंब्रह्मणः साक्षात्कारबोधकः वेदान्तशब्देन व्यवह्रियमाणः यो भागः सः ज्ञानकाण्डः।[11] तत्त्वमस्यादिमहावाक्यप्रतिपादकं यद्ब्रह्म तस्यावबोधः अत्र मुख्यो विषयः । अस्यैव ज्ञानकाण्डस्य उप निषीदति प्राप्नोति ब्रह्मात्मभावः अनया इत्युपनिषदिति व्युत्पत्त्या उपनिषद्भाग इति, वेदानामन्ते विद्यमानत्वात् वेदान्तभाग इति, अध्यात्मविद्याप्रबोधकत्वात् अध्यात्मविद्येति, परब्रह्मप्रतिपादकत्वात् ब्रह्मविद्येति च नामान्तराणि विद्यन्ते।

मन्त्रब्राह्मणयोर्वेदनामधेयमित्यापस्तम्बवचनात् मन्त्र-ब्राह्मणयरूपेण संमिलितस्य ग्रन्थस्य वेदशब्देन व्यवहारः वर्तते। मन्त्रो नाम कः ब्राह्मणो नाम कः इति जिज्ञासायामत्र तयोर्भेदः किञ्चिदिवोच्यते। तथाहि मननात् त्रायते यस्मात् तस्मात् मन्त्रः प्रकीर्तितः इतिमन्त्रशब्दव्युत्पत्तिः शब्दकल्पद्रुमकारैः प्रदर्शिता। मननं नाम पुनः पुनरभ्यासः । तेन अभ्यासेन यः अस्मान् रक्षति स मन्त्रः ।

**२. वेदे प्रतिपादितः विषयः**

अदादिविविधगणस्थेभ्यः विदधातुभ्यः वेदशब्दस्य व्युत्पत्तिः बहुधा दृश्यते यस्माच्च अनेके अर्थाः उपलभ्यन्ते।

व्याकरणशास्त्रानुसारं वेदशब्दनिष्पत्तिः **विद्– धातोः** घञ् प्रत्यये कृते भवति। धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयप्राप्तिहेतुभूतम् उपायं यः बोधयति सः वेदः। कृष्णयजुर्वेदभाष्यकृत् सायणाचार्यः वेदभाष्यभूमिकायां इष्टप्राप्य- निष्टपरिहारार्थम् अलौकिकमुपायं यः ग्रन्थः बोधयति सः वेदः इत्युवाच। किञ्च प्रत्यक्षप्रमाणेन अनुमानप्रमाणेनवा ज्ञातुं यः विषयः नशक्यते स वेदः उच्यते। सामान्यतः चतुर्धा अर्थाः अत्र प्रदर्यन्ते । तथाहि -

सत्ताया विद्यते ज्ञाने वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ श्यन्लुक्नम्शेष्विदं क्रमात् ।।

श्लोकोक्ताः अर्थाः एवं वर्तन्ते। यथा-

1. सत्तात्मकार्थः
2. ज्ञानात्मकार्थः
3. विचारात्मकार्थः
4. लाभात्मकार्थः

एते चार्थाः क्रमेणात्र विवच्यन्ते।

सत्तात्मकार्थः

सत्तार्थकविदधातोः घञ् प्रत्ययान्निष्पन्नस्य वेद इति पदस्य विद्यते सत्तां गृह्णाति वस्तु अनेनेति वेद इत्यर्थः भवति ।

ज्ञानात्मकार्थः

ज्ञानार्थकविधातोः घञ् प्रत्ययान्निष्पन्नस्य वेदशब्दस्य विदन्त्येभिः धर्मब्रह्मणी क्रियाज्ञानमयं ब्रह्म वेति वेद इत्यर्थो लभ्यते ।

विचारात्मकार्थः

विचारार्थकविदधातोः अच् प्रत्ययान्निष्पन्नस्य वेदशब्दस्य विन्ते विचारयतिधर्मत्र- ह्मणी क्रियाज्ञानमयं ब्रह्म वेति वेदइत्यर्थो ज्ञायते ।

लाभात्मकार्थः

लाभार्थकविदधातोः घञ् प्रत्यये विदन्ते स्वरूपं लभन्ते वस्तु अनेनेति वेदशब्दार्थी निष्पद्यते।

पूर्वप्रतिपादितः वेदशब्दार्थः ऋग्वेदभाष्यभूमिकायां सायणाचार्यैः संक्षिप्ततया प्रपञ्चितः। तथाहि -

विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्ते विचारयति, विदन्तेलभन्ते सर्वे मनुष्याः सत्यविद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति, ते वेदाः ।। इति ।

सायणाचार्यः वेदभाष्यभूमिकायाम् –

"इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।"[16]

### ३.वेदशाखापरिचयः

एकविंशति भेदेन ऋग्वेदो भेदितोऽमुना।
यजुर्वेदो द्विजा एकशतभेदेन भेदितः।
नवधा भेदितोऽथर्ववेदः सामस्सहस्रधा॥[12]

यद्यपि महाभाष्यकारेण पश्पशाह्निके "सर्वे देशान्तरे" इति वार्तिकोत्तरम् –

- "एकशतमध्वर्युशाखाः" (१०१) यजुर्वेदस्य,
- "एकविंशतिधा बाह्वृच्यम्" (२१) ऋग्वेदस्य,
- "सहस्रवर्त्मा सामवेदः" (१०००) सामवेदस्य,
- "नवधा आथर्वणो वेदः" (९) अथर्ववेदस्य शाखाः

इति महाभाष्ये प्रतिपादितम्।[13]

चरणव्यूहे चापरस्मिन् ग्रन्थे शाखानां प्रवचक्रमः विवृतः बहूनां तत्प्रवर्तकानां नामानि च समाम्नातानि।

### ३.१ उपलभ्यमानाः वेदशाखाः

समयेऽस्मिन् तु ऋग्वेदे शाकलशाखा एकैव प्रसिद्धा। बाष्कलशाखापि क्वचिदध्ययने वर्तते इति श्रवणमभूत्।

शुक्लयजुर्वेदे – माध्यन्दिनशाखा, काण्वशाखा इति द्वे।

कृष्णयजुर्वेदे – तैत्तिरीयशाखा, मैत्रायणीयशाखा।

सामवेदे –

- जैमिनीयशाखा
- कौथुमशाखा
- राणायनीयशाखा

अथर्ववेदे –

- शौनकशाखा
- पिप्पलादशाखा

एवं प्रकारेण आहत्य **नव शाखाः** सम्प्रति अध्ययनपरम्परायां विराजन्ते।

### ४.१ वेदस्वरमहिमा

वेदस्वरमहत्वं बहुमूल्यं भवति –

"श्रीर्वै स्वरश्च वेदानामर्थबोधः सुखं स्वरात् ।
शुद्धपाठः स्वरादेव स्वरज्ञो लभते परम् ॥[14]

### ४.२ वेदस्वरवाङ्मयम्

वेदस्वरचिह्नानि वेदेषु विविधरूपेण दृश्यन्ते। परन्तु वेदस्वरपद्धतिः समानैव विद्यते।

**"भिन्नानि स्वरचिह्नानि यदि शाखासु कासुचित् ।**
**समानैवास्ति सर्वेषां वेदानां स्वरपद्धतिः ॥"**

### ५. वेदोच्चारणस्य प्रामुख्यम्

भारतीये सर्वविधसाहित्ये संस्कृतवाङ्मये च प्रधानं स्थानमाहवति वेदः। तत्र विद्यमानानां प्रतिपादितानां नानाप्रकारकं महत्वं विद्यते इत्यत्र नास्ति लेशोऽपि संशयः । परन्तु तेन सह प्राचीनानां विश्वासः अवर्तत यत् यस्य शब्दस्वरूपम् अपि यथावत् परिपालितमुच्चारितश्च भवति चेत् तेन भद्राणि फलानि सिध्यन्ति, अन्यथा तस्य विपरीतफलप्रदत्वमपि सम्भाव्यते इति ।

अत एव पाणिनीयशिक्षायाम् –

"मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥[15]

इति पठितं वर्तते । एवञ्च वेदे " त्वष्टाहतपुत्रः " इत्यत्राऽपि श्रूयते अस्य शिक्षावचनस्य मूलभूताख्यायिका, तामप्येकवारं पश्यामः। तथाहि एकस्य त्वष्ट्रनामकस्य ऋषेः विश्वरूपनामकं पुत्रं राष्ट्राय द्रुग्धवन्तम् इन्द्रः अहनत् । अतः क्रुध्दः त्वष्टा यदा सोमयागमकरोत् स इन्द्रं हविर्भाग्रहणाय न आह्वयत्। तथापि इन्द्रः बलात् आगत्य सोमममपिबत् । तदा त्वष्टा क्रुद्धः तस्य इन्द्रस्य हन्तारमुत्पादयितुं सोमशेषम् अग्नावाजुहोत् "स्वाहेन्द्रशत्रुर्वर्धस्व' इति मन्त्रेण । तत्र इन्द्र इत्यक्षरं स्वरितं जातम्। अयं स्वरविन्यासः "बहुव्रीहौप्रकृत्यापूर्वपदम्" 'इति शास्त्रेण बहुव्रीहिसमासं प्रकाशयति । अतः इन्द्रः शत्रुः शातयिता हन्ता यस्य इत्यर्थः सम्पन्नः अतस्तस्माद्यागाद् जातं वृत्रनामकं असुरम् इन्द्रो हतवान्।

एवमेव यदि स्वरतो वर्णतो वा मन्त्राणां विपर्ययो भवति, सः अन्यथाप्रयुक्तस्सन् यजमानं वज्रवद्धिनस्ति इति शिक्षा बोधयति । अत एव तत्वप्रधानस्य उपनिषद्भागस्य आरम्भेऽपि उच्चारणनियमाः न विस्मर्तव्याः इति वेदः स्वयं बोधयति । "शीक्षां व्याख्यास्यामः – वर्णः स्वरः, मात्रा बलं, साम सन्तानः, इत्युक्तः शीक्षाध्यायः" इति ।

विषयनाममात्रेण अत्र स्मारितं शिक्षाशास्त्रम्। वस्तुतः वर्णस्वरादीनां शुद्धं स्वरूपं कीदृशम् इत्यत्र विस्तृतं लक्षणमपेक्ष्यते। तथा सति एव पाठकानां शुद्धोच्चारणं भवितुं शक्यते । अन्यथा मनुष्यमात्रसहजाः प्रमादाः इत्यतः कालान्तरेण उच्चारणे विपर्ययः सम्भाव्यते ।

किञ्च प्रत्येकस्यां वेदशाखायाम् उच्चारणपद्धतयः विभिन्नाः वर्तन्ते। एवं सति प्रतिशाखं विद्यमानानाम् उच्चारणपद्धतिविशेषाणां सन्धिनियविशेषाणाञ्च बोधनाय अवगमनाय पृथक्पृथक् लक्षणग्रन्थाः अपेक्षिताः आसन् अत एव ऋषिभिः पार्थक्येनैव विरचिताः सन्ति। एते एव ग्रन्थाः प्रातिशाख्यनामकाः सन्ति।

**६. वेदलक्षणम्**

परमेश्वरस्य निःश्वासरूपेण आविर्भूतस्य वेदस्य लक्षणं विविधैः ग्रन्थकर्तुभिः बहुधा प्रपञ्चितम् । तत्रोक्तं महर्षिणा आपस्तम्बेन –

"मन्त्रब्राह्मणयोर्वेदनामधेयम्।"[17]

अस्यायमर्थः-अनुष्ठेयार्थप्रकाशकस्य मन्त्रस्य कर्मविधायकस्य ब्राह्मणस्य च वेदत्वमिति ।

भाष्यवृद्धिः श्री मत्सायणाचार्यैः वेदलक्षणमेवं निगद्यते - इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः । इति ।।

अस्यायं भावः- अत्र अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते। अनुभूयमानस्य स्रक - चन्दनवनितादेः इष्टप्राप्तिहेतुत्वम्, औषध-सेवनादेः अनिष्टपरिहारहेतुत्वं च प्रत्यक्षतः सिद्धम्। स्वेन पुरुषान्तरेण वा अनुभविष्यमणस्य इष्टप्राप्त्यनिष्टपरिहारहेतुत्वं अनुमान- गम्यम्। ***अग्निहोत्रं जुहुयात् स्वर्गकामः*** इत्यादिवाक्यैरिष्टप्राप्तिहेतुत्वस्य, ***यो ज्योगामयावी स्यात् तस्मा एतामिष्टि निर्वपेत्***[18] इत्यादिवाक्यैः अनिष्टपरिहारहेतुत्वस्य च वेदैकगम्यत्वात् वेदव्यतिरेकेण प्रत्यक्षा-नुमानसहस्रेणापि अवगन्तुं न शक्यते। तस्मात् अलौकिकोपायबो-धको वेदः इति लक्षणस्य नातिप्रसङ्गः।

अत एवोक्तम्-

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ।। इति ।

अपौरुषेयं वाक्यं वेदः इति लौगाक्षिभास्करः। महाजनपरि-गृहीतवाक्यत्वं वेदत्वम् इत्युदयनाचार्याः। करपात्रस्वामिनस्तु शब्दातिरिक्त शब्दोपजीविप्रमाणातिरिक्तं च यत्प्रमाणं तज्जन्य-प्रमितिविषयानतिरिक्तार्थको यो यस्तदन्यत्वे सति आमुष्मिकसुख-जनकोच्चारणकत्वे सति जन्यज्ञानाजन्यो यः प्रमाणशब्दः तत्वं वेदत्वम् इति वेदलक्षणमुक्तवन्तः ।

एवं प्रतिपादितैः वेदलक्षणवाक्यैः ऐहिकफलप्राप्तये आमुष्मिक-फलप्राप्तये च अलौकिकोपायबोधकः विशिष्टानुपूर्वीकः अपौरुषेय-मन्त्रब्राह्मणात्मकः ज्ञानात्मकशब्दराशिः **वेदः** इति स्पष्टं प्रतीयते।

**पाददटिप्पणयः**

1. तैत्तिरीयोपनिषद् २.९
2. परम्पराप्रसिद्धवाक्यम्
3. बृहदारण्यकोपनिषद् २.४.१०
4. विष्णुपुराणे प्रसिद्धः श्लोकः
5. जैमिनिसूत्रम्
6. श्वेताश्वतरोपनिषद् ६.१८
7. ऋग्वेदसंहिता
8. पूर्वमीमांसासूत्रम्
9. महाभारतम्
10. मीमांसादर्शनपरम्परा
11. तैत्तिरीयोपनिषद्
12. चरणव्यूहग्रन्थः
13. पाणिनीयमहाभाष्यम्
14. शिक्षाग्रन्थपरम्परा
15. पाणिनीयशिक्षा
16. सायणाचार्यवेदभाष्यभूमिका
17. आपस्तम्बधर्मसूत्रम्
18. तैत्तिरीयब्राह्मणम्

**संदर्भसूची**

1. ऋग्वेदसंहिता
2. यजुर्वेदसंहिता
3. सामवेदसंहिता
4. अथर्ववेदसंहिता
5. बृहदारण्यकोपनिषद्
6. तैत्तिरीयोपनिषद्
7. श्वेताश्वतरोपनिषद्
8. जैमिनिसूत्रम् (पूर्वमीमांसा)
9. पाणिनीयमहाभाष्यम्
10. चरणव्यूहः
11. पाणिनीयशिक्षा
12. सायणाचार्यकृत वेदभाष्यभूमिका
13. आपस्तम्बधर्मसूत्रम्
14. महाभारतम्
15. विष्णुपुराणम्